श्री तुलसी स्तोत्रं

श्री तुलसी स्तोत्रं

जगद्धात्रि नमस्तुभ्यं विष्णोश्च प्रियवल्लभे |
यतो ब्रह्मादयो देवाः सृष्टिस्थित्यंतकारिणः | |

नमस्तुलसि कल्याणि नमो विष्णुप्रिये शुभे |
नमो मोक्षप्रदे देवि नमः संपत्प्रदायिके | |

तुलसी पातु मां नित्यं सर्वापद्भ्योऽपि सर्वदा |
कीर्तिता वापि स्मृता वापि पवित्रयति मानवं | |

नमामि शिरसा देवीं तुलसीं विलसत्तनुं |
यां दृष्ट्वा पापिनो मर्त्याः मुच्यंते सर्वकिल्बिषात् | |

तुलस्या रक्षितं सर्वं जगदेतच्चराचरं |
या विनर्हंति पापानि दृष्ट्वा वा पापिभिर्नरैः | |

नमस्तुलस्यतितरां यस्यै बद्धांजलिं कलौ |
कलयंति सुखं सर्वं स्त्रियो वैश्यास्तथाऽपरे | |

तुलस्या नापरं किंचिद्दैवतं जगतीतले |
यथा पवित्रितो लोको विष्णुसंगेन वैष्णवः | |

तुलस्याः पल्लवं विष्णोः शिरस्यारोपितं कलौ |
आरोपयति सर्वाणि श्रेयांसि वरमस्तके | |

तुलस्यां सकला देवा वसंति सततं यतः |
अतस्तामर्चयेल्लोके सर्वान् देवान् समर्चयन् | |

नमस्तुलसि सर्वज्ञे पुरुषोत्तमवल्लभे |
पाहि मां सर्व पापेभ्यः सर्वसंपत्प्रदायिके | |

इति स्तोत्रं पुरा गीतं पुंडरीकेण धीमता |
विष्णुमर्चयता नित्यं शोभनैस्तुलसीदलैः | |

तुलसी श्रीर्महालक्ष्मीर्विद्याविद्या यशस्विनी |
धर्म्या धर्मानना देवी देवदेवमनःप्रिया ||

लक्ष्मीप्रियसखी देवी द्यौर्भूमिरचला चला |
षोडशैतानि नामानि तुलस्याः कीर्तयन्नरः ||

लभते सुतरां भक्तिमंते विष्णुपदं लभेत् |
तुलसी भूर्महालक्ष्मीः पद्मिनी श्रीर्हरिप्रिया ||

तुलसि श्रीसखि शुभे पापहारिणि पुण्यदे |
नमस्ते नारदनुते नारायणमनःप्रिये ||

इति श्रीपुंडरीककृतं तुलसीस्तोत्रं ||